तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका
जूलै - २०२५ रू.२०/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 04
July 2025, Price Rs.20/-
No. of pages-24



आणिवर आस्थानम्
(पुष्प आन्दोलिकासेवा) 16.07.2025

02.06.2025 तः 10.06.2025 पर्यन्तम्

# तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः अत्यन्त वैभवोपेततया सम्पन्नः।







# गीतामृतम्

श्रीभगवानुवाच -

प्रजहाति यदा कमान् सर्वान्त्पार्थ मवोगतान्।
आत्मन्येवात्मना तुष्टः स्थितपप्रज्ञस्तदोच्यते।।

दडुःखेष्वृनुद्विग्नमनास्सुरवेषु विगत स्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।

(भगवद्गीता २.५५-५६)

पूर्णानुभवज्ञानिनः लक्षणानि अस्मिन् श्लोके प्रोक्तानि। हे अर्जुन! अन्तःकरणस्थ समस्तसंकल्पान् यदा प्रयत्नपूर्वकतया विसर्जयति तदा सः शुद्धात्मा भवति। तास्यां स्थितौ आत्मनः भिन्नवस्तुनः अभावात् आत्मनि आत्मा एव अखण्डनन्दमनु भवति। तादृशस्थिरज्ञानवान् स्थितपज्ञः इत्युच्यते।

विशेषांशः - इन्द्रियादिदृश्यविषयेषु यावद्रमते तावत्प्रकृति दोषालम्नः आत्मानन्दस्थः तदैव बन्धविमुक्तः इति ज्ञातुं शक्यते। एतत्स्थितप्रज्ञलक्षणभागः गीतायाः प्राणमिति ब्रह्मनिष्ठाः मन्यन्ते। एतत्परमभक्तानां योगीश्वराणां ब्रह्मज्ञानिनां सम्बन्धि।

दुःखेषु क्लेशरहितमनस्कः सुखेषु अनासक्तः विषयेषु अनुरागभयक्रोधरहित मननशीलः अचञ्चलज्ञानी स्थितपज्ञः इति कथ्यते। नाभिनन्दति न द्वेष्टि तस्य, प्रज्ञापतिष्ठिता।



# सङ्कीर्तनम्

श्रीरागः

चरणत्रयात्मिका शङ्कीर्तना
राजीवनेत्राय राघवाय नमो
सौजन्यनिलयाय ताटकदमनाय
कुशिकसम्भव यज्ञगोपनाय
पशुपतिमहाधनुर्भञ्जनाय नमो
विशदभार्गवरामविजयकारणाय
भरितधर्माय शूर्पणखाङ्गहरणाय
खरदूषणादिरिपुखण्डनाय
तरणिसम्भव सैन्यदक्षकाय नमो
निरुपममहावारिनिधिबन्धनाय
हतरावणाय संयमिनाथवरदाय
अतुलितायोध्यापुराधिपाय
हितकरश्रीवेङ्कटेशाय नमो
विततवाविलिपाटिवीररामाय
(वाविलपाडुग्रामः)

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम्)

# परमपावनं गुरुस्मरणम्

''शब्दे परे च निष्णातं ब्रह्मणि उपसंश्रम्'' परब्रह्म तत्त्वं परिपूर्णतया ज्ञाता तस्मिन्नेव परब्रह्मणि लीनः सद्गुरुः। ब्रह्मवित् ब्रह्मैव भवति सद्गुरुः दैवस्वरुपः। तादृशगुरोः गुरुपूर्णिमादिने पूजाः प्रवर्तन्ते। सर्वत्र प्रवर्तनीयानि च। आध्यात्मिकसाधकानां ''गुरुपूर्णिमा'' महद्दिनम्। स्वसाधने दोषान् गुरवे निवेद्य परिष्कारं ज्ञात्वा पुनः साधन-मार्गे पुरोगन्तुं अत्यधिकप्रशस्तदिनमिदम्। गुरु शिष्यपरम्परा नाम ज्ञानगङ्गायां गङ्गोत्रीव भासते। अस्माद्भारतदेशे महागुरुपीठादारभ्य अत्यन्तप्राचीनपरम्पराद्वारा गुरवः प्राचीनकालदारभ्य निरातङ्कं ज्ञानं लोकाय प्रददत्येव। अत एव गुरुपूर्णिमादिनसे वेदव्यासाय गुरुपरम्परायाश्च भक्तिपूर्वकविनम्रनमांसि समर्पयामः। गुरौ विनय विधेयताभ्यां प्रवर्तमानौ, ''सर्वं भगवन्मयं गुरुरपि भगवानेव'' इति ज्ञानेन भावेन च पुरोगमनादेव अस्माकं गुरोरनुग्रहः प्राप्यते। आत एत ''गुरुब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः गुरुस्साक्षात्परं ब्रह्म च तस्मै श्रीगुरवेनमः इत्युक्तम्। गुरुशिष्य सम्बन्धवैशिष्ट्यं गुरुपरम्परा जीवनदीव युगयुगेभ्यः अविच्छिन्नतयां प्रवर्धते। जननमरणपरम्परायां अक्षरगुरवः शिष्याश्च चिरस्मरणीयाः लोकादर्शभूताः संस्मर्यन्ते। प्राचीनगुरुभिः वेदव्यासवाल्मीकादिभिः वेदोपनिषत्पुराणमहाभारत रामायणदिमहत्तरग्रन्थाः विरचिताः पुरुषार्थसाधनमार्ग प्रदर्शकाः अध्ययग्रन्थात्मना सन्तः विराजन्ते।

दैनन्दिन जीविते कष्टनष्टाभ्यां दुःखेभ्यः विमुक्तयर्थं महद्ग्रन्थपठनात् विज्ञान सम्पादनमेव अस्माकं कर्तव्यम् ''अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकाया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः। इहपरसुखसाधनाय गुरूपदेशः सर्वस्यापि अत्यावशषकः ''गुरुवे सर्वलोकानां भिषजेभवरोगिणं। निधये सर्वविद्यानां दक्षिणामूर्तये नमः।।'' गुरुपादयोः चरणे इति नाम चरणं नाम गमनम्। शिष्येण गुरुपादस्पर्शात् गुरुगमन मार्गे अहमपि चरिष्यामीति प्रमाणीकरणमेव। गुरुपौर्णम्यां महत्तरगुरुचरणौ नमेयुः। तदाशीर्वादश्च प्राप्य धन्याः भवेम।

# जूलै -२०२५

सम्पुटिः-१२ सञ्चिका-०४

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर आषाढशुद्धषष्ठीमङ्गलवारादारभ्य - श्रावणशुद्धसप्तमी गुरुवारपर्यन्तम् - २०२५

चक्रताल्वारुवैभवम् 06
- डा के.कोटेश्वरय्य

गुरुपूर्णिमा (व्यासपूर्णिमा) 08
- आचार्य जि.पद्मनाभम

सद्बोधः संस्करोति हि जननादेव सन्ततिम् 10
- डा.यस्.शमा

मरकताम्बासमेत श्री अगस्त्येश्वरस्वामि ब्रह्मोत्सवाः नारायणवनम् 15
- डा पि.माधवी

नाथमुनिः 18
- डा.यन्.गुणवती

बाल्यादेव निष्कल्पषाः निरीर्ष्याः भवितव्याः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

बालविनोदिनी 22

मुखचित्रम् - श्रीदेवीभूदेवी सहित श्रीमलयप्पस्वामी, तिरुमल
अन्तिमपुटः- श्रीकृष्णसमेत आण्डाळ् माता।
(चित्रकारः मणियम् सेल्वन्)

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०
सूचनानाम्, आक्षेपाणां च कृते सम्पर्कं कुर्वन्तु -
chiefeditortpt@gmail.com

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका



गौरवसम्पादकः:-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -
श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*— प्रधानसम्पादकः*

धर्मस्य मूलमर्थः।

# चक्रत्ताल्वारुवैभवम्

- डा.के.कोटेश्वरय्य, चरवाणी - ९९८५१२३२६२

महाविष्णुः स्थितिकारकः देवादिवेदः। तन ध्रियमाणञ्चापयुधेषु सुदर्शनचक्रं सर्वश्रेष्ठम्। वैष्णवाः इदमायुधं भक्तिश्रद्धाभ्यां चक्रत्ताल्वारिति सेवन्ते। दक्षिण भारत वैष्णवालयेषु बहुषु चक्रत्ताल्वार इत्यस्य प्रत्येकसन्निधिः वर्तते। वैखानसागममनुसृत्य गर्भालयेषु सदुर्शनः सम्पूज्यः। सुदर्शनाविर्भावमधिकृत्य रामायणभारतभागवतदिषु बहवः विषयाः वर्णिता। मार्कण्डेयपुराणे अपि काश्चित्कथाः वर्तन्ते। संस्कृतभारते आनुशसनिकपर्वणि १४-७६ ''यत् भगवता पूर्वं दत्तं चक्रम् इति ईश्वरः एव सुदर्शनचक्रमदातिति चक्रस्य नामापि शिवेनैवकृतमिति प्रोक्तम्। आन्ध्रमहाभारते आदिपर्वणि -८-२५२,८-२५४ अग्निदेवादेशानुसारं वरुणः कृष्णाय सुदर्शनचक्रमदादिति वर्णितम्।



सूर्यः विश्वकर्मसुतायाः संज्ञायाः भर्ता सूर्यतापयसहमाना पितरं तापतीव्रतां न्यूनीकर्तुमपृच्छत्। तदा विश्वकर्मा सूर्यं यन्त्रे घर्षणात् जातभस्मनः सुदर्शनचक्रं, पुष्पकविमानं, त्रिशूलं शक्तिं निर्भीय सुदर्शनचक्रं महाशक्तियुतं विष्णवे ददौ इति विष्णुपुराणोक्तिः। सौप्तिकपर्व २-४९ अनुसृत्य अधिकनिष्ठया ब्रह्मचर्यव्रते हिमालये श्रीकृष्णः द्वादशवर्षपर्यन्तं तपः कृत्वा सुदर्शन चक्रमावापेति अन्यः विषेशः। आनुशापसनिकपर्वणि १४-७३,७९ अनुसृत्य हयग्रीवराक्षसेन चक्रवत्पर्वते सुदर्शन चक्रे रक्ष्यमाणे विष्णुः तं राक्षसंहत्वा। चक्रं जग्राहेति अन्या कथा। पुराणेति हासेषु एतादृशपरस्परवैरुद्ध्यं सर्वसाधारणमेव सुदर्शनं नाम महासौन्दर्योपेतमिति धात्वर्थः विष्णुसन्निधौ एतादृशायुधं अलङ्कारजनकं समुचितमेव।

कुरुक्षेत्रसंग्रामे सूर्यरूपधारिणं कृष्णं वीक्ष्य।

किरीटिनं गदिनं चक्रहस्तं इच्छामि त्वां द्रष्टुमहमिति अर्जुनोक्तिः।

महाविष्णुः अनेन चक्रायुधेन बहुविजयोपेतकार्याणि साधयामास। गजेन्द्रमोक्षघट्टे चक्रायुधं प्रयुज्य मकराद्गजेन्द्ररक्षणमेकं कार्यम्। सदा निन्दन्तं शिशुपालं शतदोषानन्तरं चक्रायुधं प्रयुज्य जघानेति कार्यमेकम्। कुरुक्षेत्रसमरे कृष्णे चक्रप्रयोगसंसिद्धे मां मा लाघवं (न्यून बले) कुरु इति अर्जुनः प्रार्थयामासेति पौराणिकवचनानि श्रूयन्ते।

वैष्णवसम्प्रादाये सुदर्शनस्य अत्यन्तं प्रामुख्यं वर्तते। वराहवतारे हिरण्याक्षसंहारे द्रंष्ट्रासु सुदर्शनः निगूढः हिरण्याक्षं जघानानृसिंहावतारे सुदर्शनःनखेपु निलीय तं राक्षसं जघानेति, परशुरामावतारे कुठारे रामावतारे रामबाणेषु, वामनावतारे (त्रिविक्रमावतारे) कमण्डले अवरुद्धं शुक्राचार्यं निलीय नयनघातं कृत्वा एकाक्षिनं चकारेति महतां वचनम्।

पञ्चसंस्कारेषु चक्राङ्कितं पवित्र कर्म। अनेन संस्कारेण विष्णुः नित्य सन्निहितो भवेदिति विश्वासः। अत्र वैदिकप्रमाणमपि लभ्यते।



ससर्पे च गृहे वासो मृत्यरेव न संशयः।।

संस्कृतग्रन्थेषु सुदर्शन सम्बन्धिवाङ्मयमनन्तम्। द्वादशशताब्दीकः कूरनारायणजिय्यरु सुदर्शनोपासकः। अयं कावेरीनद्यां रङ्गनाथप्लवोत्सवनेलायां प्लवे जलप्रवाहमग्न समये सुदर्शनोपासनावलात् प्लवं उद्धधारेति, वदन्ति। एवं तिरुवरंगप्पेरुमाल् अडैयरनामकः प्राणान्तकरोग बाधापीडितः कूरनारायणजिय्यरुमहाशयस्य सुदर्शनध्यानात् झटिति रोगविमुक्तः जातः इति जनोक्तिः। आल्वारुमहाशयाः बहवः सुदर्शन चक्रं बहुपर्यायं स्मृतवन्तः।

अन्नमय्यपुत्रः पेद्दतिरुमलय्य ''सुदर्शन रगड'' इति ग्रन्थं व्यरचीत्। बहुवैष्णावान्ध्रकविभिरपि सुदर्शन स्तोत्रग्रन्थाः विरचिताः।

तिरुमलक्षेत्रे स्वामि विग्रहपार्श्वद्वये शंखचक्रे, स्तः। अन्य विष्णुमूर्तिषु पृथक् हस्तयोर्विना कर्णस्थले नतवत् दृश्येते। एते श्रीपतिदर्शनार्थं आगतभक्तविशेषान् स्वामिने कथयितुमिव वर्तेते इति उह्यते।

तिरुमल ब्रह्मोत्सवेषु अन्तिमदिने उत्सेव तिरुमज्जनगोरवं सुदर्शनस्य लभ्यते। वर्षे वारत्रयं सुदर्शनं पुष्करिण्यां उन्मज्जति। तिरुमलालये पूर्वकल्याणमण्टपे हरेः सुदर्शनवतार कार्तवीर्यार्जुन भङ्गिमा दृश्यते। तिरुपति कपिलतीर्थमार्गे वरदराजस्वम्यालये चक्रत्ताल्वारु सन्निधिर्वर्तते। तमिलनाडुकुम्भ कोणम्। तेरुमेनिरो, कंचिवरदराजस्वाम्यालयेषु चक्रत्तल्वारु विशेषसन्निधिवर्तते। श्रीवेङ्कटेश्वरस्वामिनः पञ्चायुधन्येव सुदर्शनस्य षोडशायुधानि वर्तन्ते

''वेङ्कटाचलमाहात्म्यग्रन्थे तिरुमलक्षेत्र सुदर्शनः राक्षसान् स्ववीरविहारे विनाशयमासेति वर्णितम्।

### ति.ति.दे. चक्रत्तल्वारु वर्षतिरुनक्षत्रम् -

जूलैमासे २५ तिथौ इति निर्दिष्टम्। तस्मिन् सुदर्शना तिरुमज्जनपुष्पालङ्कारपूजा प्रार्थनानैवेद्यादिकार्याणि करिष्यन्ति।

स्फुरत्सहस्रारशिखातितीव्रम्
सुदर्शनं भास्करकोटि तुल्यम्।
सुरद्विषां प्राणविनाशि विष्णोः
चक्रं सदाहं शरणं प्रपद्ये।।

चक्रत्तल्वारु सन्निधौ प्रार्थनां कृत्वा सुदर्शनहोमेषु भाग स्वामिनः भूत्वा धन्याः भवेम।

## आणिवर आस्थानम्



ति.ति.देवस्थानाधिकारिणः अस्मिन् वर्षे जूलै १६ दिनाङ्के आणिवरास्थानम् प्रवर्तयिष्यन्ति। वर्षे वर्षे दक्षिणायनपुण्यकाले कर्काटकसंक्रान्ति दिने तिरुमलक्षेत्रे आणिवर आस्थानं प्रवर्तते। तमिलानां आणिमासान्ते दिने प्रवर्तमानत्वात् इदं आणिवरास्थानमिति वदन्ति। पुरा देवस्थानस्य आदायव्ययादिसांवत्सरिकगणनाः एकदिनवारास्थान दिने प्रवर्तन्ते स्म। तस्मिन् दिने स्वर्णद्वार पुरतः सर्वभूपालवाहने श्रीदेवीभूदेवीसहितमलयप्पस्वामिनं अलङ्कृत्य निवेशयन्ति। एवमन्यशिबिकायां विष्वक्सेनमलङ्कृत्य निवेशयन्ति। पश्चात् वस्त्रसमर्पणनिवेदनानि प्रवर्तन्ते। पश्चात् अक्षतारोपणानन्तरं ति.ति.देवस्थानकार्यनिर्वहणाधिकारिणे देवस्थानतालयन्त्रसमूहकश्चिकां, आरार्तिकं शठारि ददति। पश्चात् प्रसादवितरणं भवति। स्वर्णद्वारपुरतः प्रवर्तमानाणिवारास्थाने अर्चकाः, जिय्यंगारुमहोदयाः अधिकारिणः ति.ति.दे उद्योगिनः पुरवीथीषु अनुस्रियमानभक्तजनैस्सह श्रीदेवीभूदेवीसहित मलयप्पस्वामिनं पुष्पान्दोलिकायां वैभवोपेततया भ्रामयन्ति।



# गुरुपूर्णिमा

## (व्यासपूर्णिमा)

- आचार्य जि.पद्मनाभम्,
चरवाणी -९२४७३२८२८६

ज्योतिष्कैः अस्मिन् वर्षे जूलै मासे दशमदिनाङ्के व्यासपूर्णिमेति निर्दिष्टम्। ''अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः। महापुरुषस्य वेदव्यासस्य जयन्ती एव व्यासपूर्णिमा। हैन्दववाङ्मयज्ञानसंस्कृतेः प्रधानधाराभूतः व्यासः क्रिस्तोः पूर्वं ३००० वर्षसमीपे अजायत। व्यासपूर्णिमादिने भारतीयाः व्यासपूजामचरन्ति। गुरुशिष्यसम्बन्धसुदृढत्वाय व्यासमहत्त्व ज्ञापकतया च आषाढपूर्णिमादिने गुरु पूर्णिमारूपे पर्वदिनं निर्वाह्यते। अयं वेदानन्यान् धार्मिकग्रन्थान् लिपिबद्धान् कर्तुं यावज्जीवं कालमुपयुयोज सत्यवतीपराशरयोः पुत्रस्यास्य वंशः एव विष्णुसहस्रनामस्तोत्रे प्रोक्तम् -

**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्पषम्।**
**पराशरात्मजं वन्दे शुकतातं तणेनिधिम्॥**

वसिष्ठस्य प्रपौत्रं शक्तेः पौत्रं पराशरस्य पुत्रंशुकस्य पितरं तपोनिधिं, वेदव्यासं नमस्करोमीति प्रार्थनाश्लोकः। यमुनातद्वीपे जन्मत्वात् द्वैपायनः इति श्यामवर्णत्वात् कृष्णः इति, कृष्णद्वैपायनः इति नाम्ना व्यासं व्यवहरन्ति।उत्तरप्रदेश ''जालौन्'' मण्डले व्यास मन्दिरमद्यापि वर्तते। आधुनिककाले तं कौलापीति व्यवहरन्ति। व्यासः बाल्ये एव महामेधावी दूरादेव वस्तुज्ञानशक्तिमानासीत्। अस्य बाल्यकाले एव पिता गुरुरासीत्। वेदशास्त्रपुराणपण्डितस्य तस्य तदैव अज्ञातं किमपि नासीत्। बाल्ये एव तपः कर्तुमिच्छन्तं तदर्थमटवीं गन्तुं तस्य माता नेच्छति स्म। तदा व्यासः स्मरण मात्रेण त्वत्सकाशमागत्य साहाय्यं करिष्यमीति वाग्दानं दत्वा तपः कर्तुं बदरीवनं जगाम। अत एव अमुं, बादरायणः इत्यपि व्यवहरन्ति। व्यासपुरं (विलासपुरं) व्यासस्य तपः स्थानम्। अद्य तत्रैव वेदव्यासमन्दिरमपि वर्तते। मात्राशीर्वदबलेन पितृतपोबलेन व्यासः अपारज्ञानं सम्पाद्य महर्षिस्सञ्जातः। वासुदेवात् सनकादिमहर्षिभ्यश्च सर्वविद्यापारङ्गतः बभूव। अस्य धर्मपत्नी आरुणि परीक्षिन्महाराजाय भागवत पुराणकथावक्ता शुकदेवः अस्य पुत्रः। वेदाः एक रूपेण स्थिताः गुरुद्वारा मौखिकरूपेण अभ्यस्यन्तेस्म अतः वेदानां श्रुतयः इति नाम। द्वापरयुगान्ते कलियुगाविर्भावात् अधर्माभिवृद्धि धर्मविनाशः स्यादिति मानवाः अल्पबुद्धिमन्तः

मन्दाः वेदान् साङ्गोपाङ्गान् आध्ययनं कर्तुमसमर्थाः भवेयुरिति मत्वा व्यासः वेदज्ञानं सामान्यजनाय प्रापयितुं ऋग्यजुस्सामाथर्वात्मना चतुर्धा, विभज्य क्रमशः फैल, जेमिनिः वैशम्पायनसुमन्तु मुनिभ्यः अध्यापयमास व्यासशिष्यद्वारा वेदानां अनेकशाखोपशाशाः निर्मिताः। उपनिषत्सारज्ञानार्थं व्यासः ब्रह्मसूत्राणि व्यरचीत्। वेदविभागः सर्वोऽपि व्यासेन नैमिशारण्ये कृतः। वेदविभजनकारणादेव व्यासं वेदव्यासः इति व्यवहरन्ति। वेदव्यासः साक्षाद्विष्णु स्वरूपः। अत एव विष्णु सहस्रनाम स्तोत्रे

व्यासाय विष्णुरूपाय व्यास रूपाय विष्णवे। नमो वै ब्रह्ममनिधये वासिष्ठाय नमो नमः इति श्लोकः लभ्यते।

व्यासः सामान्यजनैः वेदज्ञानं प्राप्तुं महाक्लेशकरमिति, ब्रह्म, पद्म, विष्णु वायु, भागवत, नारद मार्गण्डेय, अग्नि बविष्य ब्रह्मवैवर्त लिङ्गवराह स्कन्दवामन कूर्म मत्स्य गरुडपुराण नाम्ना अष्टदशापुराणानि विरच्य लोकाय ददौ। अन्तर्द्वन्द्वसङ्कट परिस्थितिषु मातृसकाशमागत्य विपत्तिसमयेषु पाण्डवानां साहाय्यं करोतिस्म। त्रिकालज्ञः अयं युधिष्ठिरस्य ३ वर्षानन्तरं भविष्यद्राराजसूययागं माहाभारतयुद्धं, क्षत्रियनाशं दुर्यो धनविनाशञ्चाधिकृत्य पूर्ववक्तायम्। सञ्जयाय दिव्यदृष्टिं दत्वा युद्धसंघटनाः विश्वरूपसन्दर्शनञ्च अष्टादशतध्यायात्मका गीतासारं प्रत्यक्षंद्रष्टुं अवकाश ददौ। सञ्जयश्च सर्वान् युद्धविषयान् धृतराष्ट्राय निवेदयामास। व्यासः गणेशं लेखकं कृत्वा ११०००० श्लोकमहाभारतं उत्तराखण्डभद्रीनाथ घाम-समीपे ग्रामगृहायां वर्षत्रयकाले लेखयामास। तस्यां गुहायां व्यासमन्दिरं, शुकमहर्षेः श्रीकृष्णस्य प्रतिमाश्च लभ्यन्ते। गुहायां अन्धकारनिवारणार्थं नित्यं दीपमद्यापि ज्वालयन्ति। तस्यां गुहायामेव - ग्रन्थोपरिग्रन्थाः अमूल्यग्रन्थाः व्यासस्मरणार्थं निक्षिप्ताः। महाभारतस्थ भगवद्गीता ग्रंथः निष्कामकर्मयोगप्रतिपादकः प्रपञ्चस्यैव पूज्यग्रन्थः विराजते।

**नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायत पत्रनेत्र।**
**येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः।।**

इति भगवद्गीताग्रन्थे व्यासस्तुतिः। धर्मग्रन्थाननुसृत्य अष्टचिरञ्जीविषु व्यासः एकः।

''अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः कृपः मार्कण्डेयमाथाष्टकम्।''

जीवेद्वर्षशतं सोऽपि सर्वव्याधिविवर्जितः।

**गुरुपूज्यमहत्त्वम् -** गुरुः मातृपित्रनन्तरं सन्ततेः मार्गदर्शकः। गुरुः स्वज्ञाननिधिं शिष्येभ्यः दत्वा अज्ञानान्धकारं दूरीकरोति ज्ञानज्योतिः ज्वालयति। गुरुपूजाशुभमङ्गलदायिनी मोक्षप्रदात्री भवति। अतएव गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः इति प्रसिद्ध गुरुस्तुतिपरक श्लोके गुरुः त्रिमूत्यात्मकः इति स्तुतः।

**व्यासपूजा -** भारते महत्या श्रद्धया महोल्लासेन व्यासपूर्णिमापर्व निर्वहन्ति। प्रातः उत्थाय स्नानादि नैमित्तिकदिन चर्चानन्तरं शुभ्रवस्त्राणि धत्वा पवित्रमनस्कः पूजास्थले पूर्वदिग्भागे वा उत्तरद्दिभागे पूजामण्टपं निर्मीय परिशुद्धं कृत्वा व्यासचित्रपटं संस्थाप्य गुरुणामिष्टदेवतानाञ्च आवाहनं कर्तव्यम् गुरुपूजां संकल्प्य व्यासेन साकं गुरुपरम्परास्मरणं कर्तव्यम्। ''नारायण समारभ्यां शङ्कशचार्यमध्यामां। अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्। गुरुपरम्परा सिध्दार्थं व्यासपूजां करिष्ये इति मन्त्रं पठित्वा कुङ्कुमगन्धपुष्पाक्षतैः षोडशोपचारपूजा कर्तव्या। गुरुचित्र पटं पुष्पमालाङ्कृतंकृत्वा धूपदीपं गुरवे दर्शयित्वा फलमाधुर्यसहितं नैवेद्यं समर्प्य अन्ते आरार्तिकं देयम्। गुरुप्रार्थनान्तरं कृतज्ञता प्रकटनीया।ततः गुरोः आशीर्वादेन विना अस्माकं जीवने वृद्धिरेव न स्यात्। प्रायशः सामूहिकरूपेण विद्यासंस्थासु वैभवोपेततया व्यासपूर्णिमा अद्यापि निर्वाह्यते। मठेषु आश्रमेषु गुरुप्रतिमामुन्नतस्थाने निवेश्य पूजां निर्वहन्ति। अस्मिन् दिने शिष्यैः यथाशक्ति गुरुदक्षिणा रूपेण वस्त्रफलादिकं देयम्। पूजानन्तरं सत्सङ्गगुरुभजनादि सांस्कृतिकार्यक्रमाः निर्वहणीयाः। विद्यारम्भाय गुरुपूजादिनमति पवित्रम्। वेदव्यासस्य प्रसिद्धमन्दिराणि - अद्य उत्तरप्रदेश कालपीस्थन बद्रीनाथे वाराणसी रौकलासमीप ब्राह्मनीनदी तीरराजस्थाने ३० कि.मी. दूरे झाङ्करीग्रामे, प्रसिद्ध प्राचीनव्यासमन्दिराणि धूपदीपनैवेद्यपूजानिर्वहणस्थानानि वर्तन्ते।

त्रिकालज्ञं ज्ञाननिधिं वेदव्यासमेवं स्तुवन्ति - :

**अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।**
**अफाललोचनश्शम्भुः भगवान् बादरायणः।।**

**''विष्णुरुपाय व्यासाय शतकोटिप्रणामाः।''**



# सद्बोधः संस्करोति हि

## जननादेव सन्ततिम्

पुरा, कदाचित् धर्मप्रभुर्नाम राजा जनरञ्जनपालकः भक्तितत्परः सत्सङ्गेन महर्षिमार्गे ब्रह्मजिज्ञासया कालं सत्कार्येनियुज्य ज्ञानवृद्धः ज्ञानपिपासूनां ज्ञानप्रदाता सन् कालं यापयति स्म अस्य पुत्री मदालसा ज्ञाननिधिं पितरमेव गुरुं सम्भाव्य ब्रह्मज्ञानमवाप्य पूर्णमनोविकासमवाप। लोकाचारमनुसृत्य समीपदेशपालकं ऋतध्वजं परणीय जनिष्यत्सन्ततेः स्वेच्छया नामकरणानुमतिं भर्त्रा अवाप। विवाहनन्तरं मन्मथतुल्यः सुन्दरः पुत्रः अजायत। तस्य राजा विक्रान्तः इति स्वयमेव नामकरणञ्चकार। तन्नामकरणेन मदलसा भर्तुसन्निधौ जहास। भार्यायाः हासस्य कारणं राजा विभ्रान्तः नजज्ञे। धर्मपत्नी मदालसा लालनपालने एकान्तया वेदान्ततत्त्वमेव बोधयति स्म। क्षीरपानेन सह ब्रह्मविद्यामेव बालः अभ्यस्तवान्। पुत्ररोदनकाले बाल्ये कुमार! किमर्थं रुदसि? मा रुद! त्वं निरञ्जनः देहः न त्वं, देहः केवलं वस्त्रमेव। आवां, मातापितरौ इति मित्रबन्धवः न बन्धवः, केवलं भ्रमज्ञानात् तथा जानीयः, अत्र स्वकीयत्वं किमपि नास्ति। नित्यब्रह्मानन्दः एव स्थिरम्। तत्रार्त्यर्थमेव त्वं जातोऽसीति वदन्ती रुदन्तं बालं रोदनान्निवारयति स्म। एवं बाल्यादारभ्य सुखदुःखविचारेण विना लोकवांछाननुरक्ततया नित्यनिरञ्जनवत्पुत्रं सा ज्ञानमाता मदालसा पोषयति स्म। सवभिः मातृभिः एवं स्थितश्चेत् सुखदुःखसमत्वबुद्ध्या सर्वे मनोबलवन्तः स्युः। विक्रान्तः पुत्रः वेदान्तशिरोमणिः आत्मज्ञानसमुपार्जनार्थं बाल्ये एव सर्वं परित्यज्य सन्यस्य अटीवं गत्वा ब्रह्मज्ञानी बभूव। ततः किञ्चित्कालान्तरं मदालसायाः द्वितीयपुत्रः अजायत। तस्यापि पिता एव

संस्कृतानुवादः - डा. यस्.शमा
चरवाणी - ८४९८८८८२२५

सुबाहुरिति नामकरणञ्चकार। अद्यापि तन्नामकरणं श्रुत्वा मदालसा जहास। हासकरणां राजा तां नापृच्छत्। प्रथमपुत्रमिव द्वितीयपुत्रमपि आध्यात्मिकज्ञानवन्तं चकार। अयमपि मतृपदेशात् संसारे विरक्तः सन्यस्य अटवीञ्जगाम। ततः केपुचिद्वेर्षु गतेषु जातस्य तृतीय पुत्रस्य राजा एव स्वयं शत्रुमर्दनः इति नाम चकार। अद्यापि तृतीयपुत्रनाम श्रुत्वा मदालसा जहास। अस्यापि बाल्यादेव आत्स्वरूपज्ञानं बोधितवती। तृतीयपुत्रोऽपि मातृबोधानुसारं ब्रह्मज्ञानी सन् सन्न्यासदीक्षां स्वीकृत्य आत्मसाक्षात्कारमवाप। कोपि पुत्रः राज्यपालनसमर्थः पुत्रत्रये स्वभार्याबोधकारणान्न भवतीति चिन्तया मदालसां जातस्य चतुर्थपु त्रस्य नामकरणं कर्तुं अधिकारं ददौ। सा तस्य पुत्रस्य अलर्कः इति नाम चकार। अलर्को नाम उन्मादशुनकः इत्यर्थः। राजा एतन्नाम श्रुत्वा आश्चर्यचकितः किमिदं नाम चतर्थपुत्रस्य उचित्तं वेति भार्यामपृच्छत्। तदा एतावत्पर्यन्तं त्वत्कृतनामकरणं समुचितं वा? विक्रान्तो नाम एक स्मात् प्रदेशादत्यत्र शीली। गमन आत्मा सर्वान्तर्यामी सर्वत्र स एव वर्तते किल। द्वितीयपुत्रः सुबाहुः सबलसुन्दरबाहुरित्यर्थः। आत्मनः रूपमेव नास्ति। बाहुप्रसक्तिः कुत्र? तृतीय पुत्रः शत्रुमर्दनः। आत्मनः मित्रशत्रुभावः एव नस्यात्। लोकाचारमनुसृत्य यत्किमपि नाम कुर्वन्ति। नाम्नः व्यक्तिस्वभावस्य सम्बन्धः एव नास्ति। अतः केवलाह्वानार्थं मया चर्तुथपुत्रस्य अलर्कः इति नाम कृतमित्यवोयत्। भार्यावचन सारांशं ज्ञात्वा चतुर्षपुत्रं राजपालनसमर्थं कर्तुं मदालसाय निवेदयामास। सा राज्ञः अभिलाषः उचितः इति एव मत्वा प्रवृत्तिमार्गं आत्मज्ञानमपि बोधयामास। सः अलर्कः अल्पकाले एव सकलकलाविशारदः राजनीतिज्ञश्च बभूव। राजा युक्तवयसि पुत्रं राज्य पट्टाभिषिक्तं कृत्वा मदालसया सह वानप्रस्थाश्रामं प्रविष्टुममन्यत। मदालसा पुत्रमुद्दिश्य लोके बन्धाः सहजाः अनन्तक्लेशेषु प्राप्तेषु मया दीयमानङ्गुलीयकान्तर्भागे पत्रमुद्घाट्य पठ, ज्ञातव्यं ज्ञास्यसीत्युक्त्वा आशीर्दत्वा भर्त्रा अटवीं जगाम अलर्कः प्रजारञ्जकतया राज्यपालनं कृत्वा बहुवर्षानन्तरं विषयसुख विरुक्तः मातृदत्तङ्गुलीयकं स्मृत्वा तदुदूयात्य अज्ञानान्धकारात् ज्ञानदीपं प्राप्य त्वं निरञ्जनः इति वचनमपठत्। ततः पूर्वसोदरवत् आत्मज्ञानी भूत्वा विषयवांछाविरक्तः राज्यं परित्यज्य अटवीषु तपः कुर्वन् ब्रह्मज्ञानी निरञ्जनः सञ्जातः। मदालसेव, सर्वाभिः मातृभिः सन्ततेः बाल्यादेव परब्रह्मतत्त्वबोधः कृतश्चेत् सर्वे अनर्घात्मज्ञानिनः जीवन्मुक्ताः भवेयुः।

## तिरुपतिस्थ

# श्रीगोविन्दराजस्वामिनः

## ज्येष्ठाभिषेक महोत्सवः

### 06.07.2025 आरभ्य 08.07.2025 पर्यन्तम्







# श्रीगरुडाष्टोत्तर शतनामावळिः

गरुडस्तोत्रपारायणात् विशिष्य सन्तानप्राप्तिः अविवाहितानां विवाहप्रप्तिश्च भवेत्। दीर्घायुर्भवेत्। स्तोत्रपारायणात् शुभसूचनाप्यपि द्रक्ष्यन्ति। सकलपापानाशः स्यात्। भगवति अचञ्चल भक्तिविश्वासाः वर्धेयुः। अत एव गरुडस्तोत्रपठनं महत्वपूर्णमिति प्रोक्तम्। एतत्कारणादेव सप्तगिरि पाठकेभ्यः स्तोत्रमिदं पारायणार्थं दीयते।

आचार्य के.सर्वोत्तमराव् - विरचितात् पेरियतिरुवडि शिरियतिरुवडि ग्रन्थात्।



नमः पन्नगनद्धाय वैकुण्ठवशवतिते।
श्रुतसिन्धुसुधोत्पादमन्दराय गरुत्मते।।

ओं श्रीवैनतेयाय नमः
ओं खगपतये नमः
ओं काश्यपेयाय नमः
ओं महाबलाय नमः
ओं तप्तकाञ्चनवर्णाभाय नमः
ओं सुपर्णाय नमः
ओं हरिवाहनाय नमः
ओं छन्दोमयाय नमः
ओं महातेजसे नमः
ओं महोत्सहाय नमः 10
ओं महाबलाय नमः
ओं ब्रह्मण्यायाय नमः
ओं विष्णुभक्ताय नमः
ओं कुन्देन्दुधवलाननाय नमः
ओं चक्रपाणिधराय नमः
ओं नागारये नमः
ओं नागभुषणाय नमः
ओं विद्वन्मयाय नमः
ओं विशेषज्ञाय नमः
ओं विद्यानिभाय नमः 20
ओं अनामयाय नमः
ओं भूतिदाय नमः
ओं भुवनत्रात्रे नमः
ओं भयघ्नाय नमः
ओं भक्तवत्सलाय नमः
ओं सप्तछन्दोमयाय नमः
ओं पक्षिराजाय नमः
ओं सुरासुर सुपूजिताय नमः
ओं भुजङ्गभुजे नमः
ओं कच्छपाशिने नमः 30
ओं दैत्यहन्त्रे नमः
ओं अरुणानुजाय नमः
ओं निगमात्मने नमः
ओं निराधाराय नमः
ओं निस्त्रैगण्याय नमः
ओं निरञ्जनाय नमः

ओं निर्विकल्पाय नमः
ओं परञ्ज्योतिषे नमः
ओं परात्पराय नमः
ओं परस्मै नमः 40
ओं शुभाङ्गाय नमः
ओं शुभदाय नमः
ओं शूराय नमः
ओं सूक्ष्मरूपिणे नमः
ओं भृहत्तनवे नमः
ओं विषाशिने नमः
ओं विजितात्मने नमः
ओं विजयाय नमः
ओं जयवर्धनाय नमः
ओं अजास्याय नमः 50
ओं जगदीशाय नमः
ओं जनार्दनमहाध्वजाय नमः
ओं घनसन्तापच्छेत्रे नमः
ओं जरामरणवर्जिताय नमः
ओं कल्याणदाय नमः
ओं कलातीताय नमः
ओं कलाधरसमप्रभाय नमः
ओं सोमपाय नमः
ओं सुरसङ्घेशाय नमः
ओं यज्ञाङ्गाय नमः 60
ओं यज्ञभूषणाय नमः
ओं वज्राङ्गाय नमः
ओं वरदाय नमः
ओं वन्द्याय नमः
ओं वायुवेगाय नमः
ओं वरप्रदाय नमः
ओं महाजवाय नमः
ओं विदारिणे नमः
ओं मन्मथप्रियबान्धवाय नमः
ओं यजुर्नाम्ने नमः 70
ओं अनुष्टुभ्भुजाय नमः
ओं मारकाय नमः
ओं असुरभञ्जनाय नमः
ओं कालज्ञाय नमः
ओं कमलेष्टाय नमः
ओं कलिदोषनिवारणाय नमः
ओं स्तोमात्मने नमः





ओं त्रिवृन्मूर्ध्ने नमः
ओं भूम्ने नमः
ओं गायत्रीलोचनाय नमः 80
ओं सामगानरताय नमः
ओं स्रग्विणे नमः
ओं स्वच्छन्दगताय नमः
ओं अग्रणे नमः
ओं विनतानन्दनाय नमः
ओं श्रीमते नमः
ओं विजितारातिसङ्कुलाय नमः
ओं पतद्वरिष्टाय नमः
ओं सर्वेशाय नमः
ओं पापघ्ने नमः 90
ओं पापमोचकाय नमः
ओं अमृतांशवे नमः
ओं अमृतवपुषे नमः
ओं आनन्दगतये नमः
ओं सुधाकुम्भधराय नमः
ओं दुर्धराय नमः
ओं असुरभञ्जनाय नमः
ओं अग्रजिते नमः
ओं जयगोपाय नमः
ओं जगदाह्लादकराय नमः 100
ओं श्रीगरुडाय नमः
ओं भगवते नमः
ओं स्तोत्राय नमः
ओं शोभाय नमः
ओं स्वर्णवपुषे नमः
ओं स्वराजे नमः
ओं विद्युन्निभाय नमः
ओं विशालाङ्गाय नमः
ओं विनतादास्यमोचकाय नमः

वेगोत्थानं वितानं व्यजनमयगुणं वैजयन्तं जयन्तं
मित्रं नित्यार्यमित्रं युधि विजयरथो युग्ययोगानपेक्षः।
दासो निष्पर्युदासो दनुजभिदो निस्सहायः सहायः
दोधूयेतास्मदीयं दुरितमधरितारातिपक्षैः स्वपक्षैः।।



तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः
पुष्पयागमहोत्सवः
02.07.2025



अप्पलायगुण्ट, श्री प्रसन्नवेङ्कटेश्वरस्वामिनः
पुष्पयागमहोत्सवः
12.07.2025



# मरकताम्बासमेतश्री अगस्त्येश्वरस्वामि ब्रह्मोत्सवाः

## नारायणवनम्

- डा.पि.माधवी, चरवाणी - ८५१९८०४७८४

अगस्थेश्वरस्वामिब्रह्मोत्सवाः जून् मासे २५ तिथितः प्रारभ्यन्ते। श्री आन्मायाक्षिमातुः आलयस्य दक्षिणदिशि समीपे दिव्यप्रशान्तिनिलयः बहुप्राचीनः शिवालयः दृश्यते। स एव श्रीमरकताम्बिकासमेत श्रीअगस्त्येश्वरालयः। अरुणानद्याः पश्चिमतीरे विद्यमानस्य अस्य आलयस्य प्रस्तावना वेङ्कटाचलमाहत्म्य ग्रन्थेऽपि दृश्यते।

वनविहारार्थमागता पद्मावती मृगयार्थमागत श्रीनिवासं दृष्ट्वा मोहपरवशा भवति। मोहिता पद्मावती तापज्वरपीडिता भवति। पुरोहिताः तत्तापज्वरोपशमनाय अगस्त्येश्वरस्वाम्यभिषेकः कर्तव्यः इति सूचयामासुः। आकाशराजेन अभि,कप्रयत्नः कृतः। एतत्तीर्थजलार्थं पद्मावतीसख्यः अपि आगताः। तस्मिन्नेव समये वकुलमाता नारायणवनालयदर्शनानन्तरं श्रीनिवासाय पद्मावतीं विवाहार्थं अङ्गीकर्तुं राजमन्दिरमागता।

### स्थलपुराणम् -

आकशराजवंशीय गृहदेवतात्वेन विराजमानस्य अगस्त्येश्वरस्वामिनः आविर्भवकथा सर्वश्राव्यैव। अत्र प्रकृति रमणीयपरिसरवातावरणविशिष्टस्य ेकस्य सरोवरस्य तीरे अगस्त्यः तपः आचरति स्म। तदा अष्टदेवकन्याः अगस्त्यं दृष्ट्वा वामनः इति परिहसितवत्यः। तदा कृद्धः महर्षि ताः ‘‘भवत्यः कुब्जाः भूत्वा भूलोकपतिताः भविष्यन्तीति शशाप। तदा ताः तत्पादयोः पतित्वा पश्चात्तप्ताः क्षमां, याचितवत्यः आसनसः परमेश्वरमाराध्य शापविमोचनं प्रप्नुवन्तु इत्यवोचत्। तदा ताभिः सर्वाभिः शिवध्यानात् तस्मिन् सरस्येव शिवलिङ्गं प्रादुर्भूतम्। अगस्त्येश्वरसमक्षे स्वयंव्यक्तशिवलिङ्गपूजया तासां सर्वासां शाप विमुक्तिः सञ्जाता। तदेव स्वयम्भूशिवलिङ्गं अगस्त्येश्ररस्वामि महाशिवलिङ्गमिति प्रकीर्त्थते। अरुणानदीतीरस्य पश्चिमदिशि अगस्त्येश्वरस्वाम्यालयः प्राङ्मुखत्वेन निर्मितः। प्रधानालयपरितः प्राकारः निर्मितः। पश्चिमदिशि गोपुरशिखरैर्विना अलङ्कारशिल्पसहित प्रवेश - द्वारमण्टपः वर्तते।

### आलयप्राङ्गणम् -

आलयप्रवेशद्वारे प्रवेशानन्तरं प्रड्मुखनिर्मितालयस्य प्रदक्षिणतया गम्यमाने सति प्राङ्गणे वायव्यकोणे दक्षिणमुखे चण्डिकेश्वसन्निधिः, ईशान्यकोणे दक्षिणमुखे कालभैरवसन्निधिः, तत्पार्श्वे पश्चिममुखतया भगवतः सूर्यस्य

सन्निधिः, पश्चात् आलयस्य प्राग्दिशि बलिपीठः, तत्पुरतः बलिपीठः, तत्पुरतः ध्वजस्तम्भः, तत्पुरतः नन्दीश्वरविग्रहमण्टपः क्रमशः वर्तन्ते। नन्दीश्वरविग्रहस्य पुरतः आलयप्राकारे निर्मितगवाक्षद्वारा दृष्टंचेत् आलयान्तर्भागे प्रग्दिशत्वेन अगस्त्येश्वरलिङ्गं दृश्यते। नन्दीश्वरसमीपात् अगस्त्येश्वरदर्शनानन्तरं पुरोगमने सति स्वल्पपरिमाणकूपः, पाचकशाला च दृश्यते। नन्दीश्वरसमीपात् अगस्त्येश्वरदर्शनानन्तरं पुरोगमने सति स्वल्पपरिमाणकूपः, पाचकशाला च दृश्येते ततः दक्षिणदिग्गमने अगस्त्येश्वर - स्वामिनः आलयप्रधान प्रवेशद्वारं वर्तते। आलयस्य उत्तराभिमुखप्रवेशे सति अन्तः अगस्त्येश्वरस्वामिनः शिवलिङ्गं प्रामुखतया गर्भालयदर्शनं स्यात्। गर्भालयोपरि एककलशगोपुरं त्रितलत्वेन निर्मितम्। गर्भालयस्य पुरतः द्वयोः पार्श्वयोः प्रतिष्ठिताः अतिप्राचीनशिलामूर्तव्यः भक्तिचैतन्याह्लादकत्वं मनसि जनयन्ति। गर्भालयस्य द्वारे वामभागे सप्तमातृकाः, गणपतिः, दक्षिणदिशि सुब्रह्मण्यस्वामी, पश्चिमदिशि काशीविश्वेश्वरलिङ्गं तत्पुरतः नन्दीश्वरविग्रहः, पश्चात् अन्नपूर्णादेवी विग्रहः पश्चात् कार्तिकेयविग्रहः प्रामुखत्वेन प्रतिष्ठिताः नित्यं पूज्यमानाः भवन्ति। अगस्त्येश्वरस्वामिनः पाश्वे प्रत्येकगर्भालयसन्निधौ ''मरकताम्बा'' नाम्ना पार्वतीदेव्याः विग्रहमूर्तिः प्रतिष्ठिता। मरकताम्बिका, मरकतवल्ली वा इति प्रसिद्धा पार्वतीदेवी अगस्त्येश्वरस्वामिनः प्राङमुखे वर्तते। अगस्त्येश्वरमरकताम्बिका गर्भालययोः एककलशगोपुराणि वर्तन्ते।

एतद्दर्शनानन्तरं निऋ तिकोणे श्री डण्ठिविनायकदर्शनं प्राङ्मुखे लभ्यते। एतावता आलयप्रदक्षिणं समाप्तं स्यात्।

मरकताम्बिकासमेतश्रीअगस्त्येश्वर स्वाम्यालये प्रत्यहं प्रातः क्षीरजलेन शुद्धजलेन च अभिषेकः प्रवर्तते। अर्चनानन्तरं, दध्योदनं निवेद्यते। सायं समये एकान्तसेवा, अन्ते आस्थाने शुद्धान्नपायसं निवेद्यते। अगस्त्येश्वरस्वामि शिवालिङ्गस्य सोमवारे एव विशिष्य पञ्चामृताभिषेकः प्रवर्तते। अभिषेक द्रव्याणि क्षीरदधिपञ्चामृत विभूतिकुङ्कुमनारिकेलजलादिद्रव्याणि समर्प्य मरकताम्बिकासमेत श्री अगस्त्येश्वरस्वामिने यस्मिन् कस्मिन् दिने प्रातः एव अभिषेकः कर्तव्यः। अस्मिन्नालये महाशिवरात्रि सन्दर्भे अभिषेकार्चनाः वैभवोपेततया निर्वाह्यन्ते।

**ब्रह्मोत्सवाः -**

चैत्रपौर्णमीदिन समाप्तत्वेन अगस्त्येश्वरस्वामिनः दशदिनपर्यन्तं ब्रह्मोत्सवाः प्रवर्तन्ते। दशदिनेषु रात्रौ चन्द्रप्रभा, सिंह, हंस, शेष, नन्दि, गज, रथोत्सव वाहनेषु, कल्याणोत्सव वीथीपरिभ्रामणोत्सवाः, सायं समये कल्याणोत्सवाः प्रवर्तन्ते अन्तिमदिने त्रिशूलस्नानं प्रवर्तते। अस्मात् ५ कि.मी. दूरस्थ कैलासकोण क्षेत्रपर्यन्तं अलङ्कृतस्वामिनं जनसमूहेन मङ्गलावाद्यघोषैः नीत्वा त्रिशूलस्नानाचरणात् ब्रह्मोत्सवाः परिसमाप्यन्ते। वर्षे वर्षे जनवरि कनुमपर्व दिने अगस्त्येश्वरस्वामी पराशरेश्वरेण सह गिरिप्रदक्षिणं करोति। तस्मिन्दिने सायंसमये पञ्चमघण्टातः आरब्धः उत्सवः अर्धरात्रौ समाप्तिमेति। अस्मिन्नुत्सवे परिसरग्रामस्य षोडशालय देवप्रतिभाः नगरीपर्वत परितः मण्टपं प्रापयन्ति। तत्र पूजानिर्वहनानन्तरं प्रतिनिवर्वन्ते।

**पवित्रोत्सवाः -**

अगस्त्येश्वरस्वाम्यालये यावद्वर्षे प्रवर्तमानार्चनोत्सवेषु प्रवेशनिषिद्ध वेळासु अज्ञाततया भक्तैर्वा आलयोद्योगिभिर्वा दो,ाः कृतस्सयुः। तद्दोषनिवारणार्थं शैवागममनुसृत्य भाद्रपदमासे शुद्धषष्ठि सप्तमी अष्ठमीदिनेषु पवित्रोत्सवाः निर्वाह्यन्ते।श्रीमरकताम्बिकाश्री अगस्त्येश्वरस्वाम्या आलयस्य उत्सवमूर्तव्यः, नारायणवनस्य श्रीपराशरेश्वरस्वाम्य आलये भद्रतया निक्षिप्यन्ते। ब्रह्मोत्सवमहा शिवत्रयाद्युत्सवावेळास्वे उत्सवमूर्तयः वहिरानीता उत्सवेषु अलङ्कृतोः पूज्यन्ते।

**नमश्शिवाभ्यां वृषवाहनाभ्यां**
**विरिञ्चि विष्ण्वन्द्र सुपूजिताभ्यां**
**विभूतिपाटीर विलेपनाभ्यां**
**नमो नमः शङ्करपार्वतीभ्यां**

विवाहनन्तरं सुवर्णमुखरीकल्याणी नदीसङ्गम तीरे, लोपायमुद्र -आगस्त्याश्रमवाटिकायां पद्मावतीश्रीनिवासौ ऋषिदम्पती दर्शनं प्रापुः।कुम्भसम्भवः तयोः स्वागतसत्कारातिथ्यं ददौ ततः मासषट्कपर्यन्तं निषिद्धतीर्थयात्रौ पद्मावती श्रीनिवासौ अगस्त्याश्रमे एव कालं सानन्दं यापयामासतुः।

**अगस्त्यमहिर्षमहत्त्वम् : -**

ब्रह्मर्षिषु अगस्त्यः अग्रगण्यः वसिष्ठ सहजन्मा, त्रिकालवेदी भक्तिज्ञानरागविरागनिधिरपि गृहस्थरन्नर्मिाति ख्याति मवाप। तारकासरादयः दिवा समुद्रे विलीनाःरात्रौ देवमुनिमानव बाधकाः

द्वादशसहस्र वर्षपर्यन्तं पीडयामासुः। अग्निवायू महेन्द्रेण तारकदिराक्षस संहरणाय प्रेषितावपि तान् हन्तुमसमर्थौ जातौ। तदा तावग्निवायू अचेतनपदार्थात् भूमौ मुनिरूपे जनिष्यतः इति इन्द्रेण शप्तौ।

विष्णुः नरनारायणावतारे तपः कुर्वन् तपोभङ्गाच इन्द्र प्रेषिताप्सरस्त्रीप्रयन्तान निष्फलान् कृत्वा स्वोरुप्रदेशादेव अप्परसं ऊर्वशीं जनयामास। जातामूर्वशीं दृष्ट्वा सूर्यवरुणौ कामपरवशौ स्खलितवीर्यं जलपूर्णकलशे परित्यज्य गतौ। तस्यामात्कलशात् अगस्त्यवशिष्ठौ जातौ। एवं जातः अगस्त्यः बाल्यादेव देवताभिः प्रणवपञ्चाक्षरीमन्त्रोपदेशं उपनयनसंस्कारं प्राप्य दिव्यतेजस्समन्नः बभूव। एकदा सः अधोमुखतया लम्बमानपितृदेवताः दृष्ट्वा कारणं पृष्टाः विवाहात् सन्ततिं प्राप्य पुंनामनरकात् अस्मान् पाहि इत्यवोचन्। पितृ मनोभीष्टं पूरयितुं स्वतपोबलेन अनपत्यतापीडिताय विदर्भराजस्य पुत्रिकाप्राप्तिवरं दत्वा प्राप्तयुक्तवयस्कां लोपामुद्रां परिणयार्थं राजानमपृच्छत्। सुतायाः अङ्गीकारं स्वीकृत्य राजा उभयोः विवाहश्चकार।

ततः लोपामुद्रा सन्तानप्राप्त्यर्थं भर्त्रा पृष्टा अमूल्या भरणवस्त्राणि दत्तानि चेत् सङ्गमार्थं सन्तानार्थ मङ्गीकरिष्यामीत्यवोचत्। तदा अगस्त्यः धनसम्पादनार्थं गच्छन् मणिमतीपुराधिपौ वातापील्वलौ महा धनवन्ताविति तत्सकाशं धनार्थं ययौ। वञ्चनया भोजनसमर्पणव्याजेनअजारूपेण समांसमेव खादितुं दत्वा ततः ज्ञातवञ्चनावृत्तान्तेन अगत्स्येन ''वातापि जीर्णं इति उक्ते, सति वातापिः जीर्णं बभूव। ततः इल्वलः भीतः अपेक्षितं सर्वं धनं अगस्त्याय ददौ। ततः तद्धनं अलङ्कारांश्च भार्यायै दत्वा संतृप्तया तया सङ्गमात् दृढदस्युनामकपुत्रं तस्मात् तेजस्वीनामक पौत्रं अलभत। अगस्त्यः एवं पितृदेवताभिलापं पूरयित्वा तेषामूर्ध्वलोकगतिं ददौ। ततः कवेरराजर्षेःपुत्रिकां ब्रह्ममायारूपां ब्रह्मणः आदेशात् विवाहात् स्वधर्मपत्नीं कृतवान्। सैव कावेरीनदी रूपेण परिणता। दधीच्यस्थिभिः निर्मितायुधैः वृत्रासुरे मृतेऽपि कालकेयराक्षसगणः वसिष्ठाश्रमे १९७ ऋषीन् च्यवनाश्रमे शत १०० ऋषीन् भरद्वाजाश्रमे २० ऋषीन् ब्रह्मविदश्च भक्षितवन्तः। तदा इन्द्र यमाग्नि वरुण कुबेरादयः विष्णुं शरणं ययुः। विष्णुः एव समुद्रजलं पातुं अगस्त्यः एव समर्थः इति तानुवाच प्रार्थितः अगस्त्यः समुद्रजलं अञ्जलिना पपौ। तदा बहिर्गताः सर्वे राक्षसाः देवगणैः हताः। पश्चात् पुनः समुद्रजलजीव रक्षणार्त प्रार्थितः अगस्त्यः पीतं समुद्रे जलं केवलं मूत्रजलद्वारा एव पूरयिष्यामीति तथैव चकार।

ततः रामरावण युद्धे बाणाघातविवशं रामं समीप्य तस्य विष्णवतारं ज्ञापयित्वा आदित्यहृदयमुपदिश्य युद्धाय प्रोत्साहयामास। तदा रामः तेजोबलसम्पन्नः महोत्साहेन युद्धंकृत्वा रावणासुरं जघान। कदाचित् अगस्त्यः द्वादश वार्षिक यज्ञमाचरति स्म। तदा इन्द्रः वर्षाभावश्चकार। तदा अगस्त्यः अहमेव तपश्शक्त्या इन्द्र पदवीं प्राप्य पर्याप्तंवर्षं वर्षापयिष्या-मीत्यवोचत्। तदा भीतः इन्द्रः अगस्त्यं शरणं प्राप्य पर्याप्तं वर्षपातं ददौ। ततः तारकब्रह्मोपदेशार्थं अगस्त्यः अविमुक्तक्षेत्रं जगाम। विन्ध्यपर्वतः मेरुपर्वते असूयया सूर्यः मेरुपर्वतपरितः एव भ्रमति नात्मानं परिभ्रमतीति सूर्यचन्द्र नक्षत्रगमनाय अवरोधश्चकार। तदारात्रिन्दिवाभावात् लोकव्यवहारः भग्नः आसीत्। तदा ब्रह्मा अगस्त्यमुनिरेव विन्ध्यपर्वतं दमयितुं शमयितुं समर्थः इति देवान् प्रोवाच। तदा देवप्रार्थितः अगस्त्यः तदा काशीक्षेत्रत्यागबाधितोऽपि लोकक्षेमार्थं विन्ध्यपर्वत - सकाशमागत्य अहं भार्यया सह दक्षिणापथतीर्थयात्रार्थं गच्छमि। तव श्रृङ्गान ततः अधिरोहितसमर्थौ। अतः अस्मादागमनपर्यन्तं भूतलसममेव ततः वर्तितव्यमिति अवोचत्। तदा विन्ध्यः ''चराचरप्रपञ्चस्यापि तवाज्ञा अनुल्लङ्घनीयेति'' तवाभीष्टं पूरयिष्यामीति उक्त्वा तथैव चकार। एवं ब्रह्मर्षिरयं बहूनि लोकोपकारकार्याणि गृहस्थः एव चकार।




पाठकेभ्यः विज्ञप्तिः - सप्तगिरिग्राहकानां गृहप्राप्तिस्थानं परिवर्तितश्चेत् सम्बन्धितसप्तगिरि कार्यालयस्य पत्रलेखनद्वारा वा मेलद्वारा वा अवश्यं विज्ञप्तिः प्रेषणीया।

कार्यालय प्राप्तिस्थानम् - प्रधानसम्पादकः, सप्तगिरिकार्यालयः द्वितीयफ्लोर्, ति.ति.दे. प्रेस् के.टि.रोड्, तिरुपति 517 507. तिरुपति जिल्ला (आ.प्र.) (वा) ई मेल् ऐडी - chiefeditortpt@gmail.com



# नाथमुनिः

- डा.यन्.गुणवती

चरवाणी - ८९१९६२०२२६

**ज्येष्टमासे बनूराधाजातं शठजिदाश्रयम्।**
**उद्धर्तारं प्रबन्धानां श्रीमन्नाथमुनिं भजे।।**

दक्षिण भारतदेशे श्रीरामानुजदर्शननम्ना विशिष्टाद्वैतस्य प्रबलग्रन्थराशिः नालायिरम्। नालायिरम् नाम चतुस्सहस्रम्। नालायिरे चतुस्सस्रपाशुराणि सन्ति। एतेषां गातारः द्वादशान्वरु महाशयाः। आल्वारमहाशयानां अपूर्वग्रन्थसमुच्चये भिन्नभिन्नकारणैः नष्टे समान्यप्रजानां कृते तेषां प्राप्ति - स्थानं स्वप्रयत्नेन ज्ञात्वा तानि लब्ध्वा भविष्यत्प्रपञ्चस्य अपूर्वनिधित्वेन नादमुनिः भद्रञ्चकार।

नवमशताब्द्यां परान्तकयोलः राज्यं पालयति स्म। ईश्वरभट्टस्य ८२३ वर्षे अनूपानक्षत्रे तमल अनिमासे शोभकृद्वर्षे वीरनारायणपुरे श्रीरङ्गनाथनामकः पितृकृतनामकरणः तदनन्तरकाले नदमुनिरिति प्रसिद्धः तमिलनाडुराष्ट्रे कश्चित् महापुरुषः अजायत। नाथमुनिः बाल्यकाले एव स्वोत्साहेन निरन्तरपठनात् वेदज्ञानमवाप। मातापितृभ्यां सह बहुवारं उत्तर भारते शालिग्रामः, हरिद्वारु, बृन्दावनम् मधुरा पूरी, तिरुपति इत्यादि पुण्यक्षेत्राणि ददर्श। ततः उत्तरभारतात् प्रतिनिवृत्य कत्तुमन्नरुदेवालयस्थ मन्नारुदेवस्य कांक्षामनुसृत्य तद्देवालय कैङ्कर्यं करोति स्म।

कदाचित् तीर्थायात्रासन्दर्भे मन्ननारुदेवालयमागत्य नम्माल्वारु रचित तिरुवायूमोली ग्रन्थस्य एकादश पाशुराणि श्राव्यतया अगायत। अन्यानि पाशुराणि वर्तन्ते वा इति नाथमुनिः तान् अपृच्छत्। ते कुम्भकोमे कुरुनूरुस्थाने अन्विषन्तु इति अवोचत्। तादमुनिः कुरुमूरुगत्वा तत्र पोलिन्दनिन्द पिरान्। कुरुगूरुशठगोपुरं, अपश्यत्। तत्र मधुरकविशिष्यं पराङ्कुशं मिलितवान्। सः सानन्दं स्वगुरुमधुरकविरचितानि एव द्वादशपाशुराणीत्यवोचत्। सः सानन्दं सगुरुमधुरकविरचितानि एव द्वादशपाशुराणीत्यवोचत्। १२००० पाशुराणां पारायणे कृते - नम्माल्वार्वनुग्रहात् नालयिर सर्वमपि लभ्यं स्यादिवोचत्। नाथमुनिः नम्माल्वारु सन्निधौ १२००० वारं भक्तिश्रद्धाभ्यां पारायणञ्चकार। प्रीतः नम्माल्वारु ४००० पाशुराणि अनुगृह्य ददौ। नम्माल्वारु महाशयस्य इय्यक्कोण्डरु कुरुगै, कावल् अप्पन् इति प्रमुखशिष्याः अपि सन्ति। एतेब्यः नम्माल्वारु वैष्णवरहस्यानि नालायिरप्रबन्ध विशेषान् वोधयामासुः। स्ववंशे जायमानपौत्रस्यापि एतानि बोध्यानीति अवोचत्। सः पौत्रः यामुनाचार्यः एव नादमुनिः न केवलं तमिलग्रन्थाध्येता न्यायतत्त्वं योगरहस्यानि इति ग्रन्थद्वयमपि संस्कृते व्यरचीत्। एतदग्रन्थद्वयं रामानुजाचार्यस्य विशिष्टद्वैतमतस्थापनाय उपकृतमिति वैष्णवाचार्यैः प्रोक्तम्। वेदव्यासः इव वेदसारनालायिरग्रन्थं विभज्य गानरूपे स्थिरीकृत्य नाथमुनिः कृतकृत्यः अभवत्। नम्माल्वार ग्रन्थाः तिरुविरुत्तम् तिरुवाशिरियम् पेरियतिरुवन्त तिरुवायूमुल्ली, रहस्यत्रयम्।

रात्रित्रयानन्तरमेव नम्माल्वारुमहाशयः नादमुनिमनुगृहीतवानिति साम्प्रदायिकानां विश्वासः। ततः

नाथमुनिः तानि मुदलायिरं, पेरियतिलिइयर्पा (तनूरुकौग) इति म्बिरयिमुली पाशुराणि सङ्गीतबद्धानि चकार। मुदलायिरं, पेरियाल्वारु तिरुमुनि भागस्य प्रास्ताविकगेयमपि व्यरचीत्। एवं मधुरकवेः कन्निन्नुमुम् - चिरुत्तांम्बू ग्रन्थस्य प्रस्तावनारूपे पाशुरं, एवं नम्माल्वारु तिरुवायिमुलिकीति प्रत्येकपाशुरं लिलेख। एतेषां पाशुराणां गानाय शिष्यानपि संसिद्धान् चकार। तेषु मेलैगत्ता -

अल्वारु मेलैजि त्ताल्वरुप्रमुखौ शिष्यौ।

एतत्कार्ये अकृते आधुनिकानां नालायिरमेव लब्धं नस्यात्। एतन्नालायिरं भविष्यत्काले सर्वलभ्यत्वेन वेदान्तदेशिकादयः श्रीरङ्गादि वैष्णवक्षेत्रेषु अध्ययनोत्सवनाम्ना पण्डितैः स्वरमुयुक्तत्वेन पारायणनिर्वहणसम्प्रदायं स्थिरी चक्रुः।

अयं सम्प्रदायः तिरुपति - तिरुमल श्रीवेङ्कटेश्वर गोविन्द राजालयेषु अखण्डतया प्रवर्तते। तिरुमलक्षेत्र नालायिरप्रबन्ध पारायण विधानं अकुष्ठिततया प्रवर्तयितुं सुप्रसिद्ध पण्डितैः गानकलाकोविदैः टि.ए.गोपालन् महाशयैः रिकार्ड् कृतम्। नाथमुनिमहाशयः ९३ वर्ष पर्यन्तं जीवित्वा वनः ब्रह्मैक्यमवापेति साम्प्रदायिककथनम्।

अन्त्यकाले नाथमुनिसम्बन्धाश्चर्यकर वृत्तान्तः - नम्बूरि केशवाचार्यः स्वसूक्तिमुक्तावल्यां एवं विवृणोति-ःयदा नाथमुनिः स्वगृहे आसीत् तस्य पुत्रिकाद्वयं समीप्य एवमूचतुः - हे पितः अद्य द्वौ आयुधधारिणौ महालक्ष्मीसमेतयामाङ्गल्यवत्या, बालवानरेण सह आगताः नाथमुनिः किं करोति - इत्यपृच्छन्। ततः क्षणकालमुषित्वा ते सर्वे गताः इत्यवोचताम्। नाथमुनिः झटिति दिग्भ्रान्तः उत्थाय कुत्र ते इति बहिरागत्य दृष्टान् सर्वान् पप्रच्छ। समाधानाभावात् तान् सीता रामलक्ष्मणाञ्जनेयान् न दृष्टोस्मीति दौर्भाग्योहमिति तत्रैव प्राणान् तत्याज।



# परोपकारपद्धतिः

१. भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनोघनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

२. श्रोत्रं श्रुतेनैव न कुलेन
दानेनपाणिर्नतु कङ्कणेन।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन।।

३. पद्माकरं दिनकरो विकचं, करोति
चन्द्रो विकासयति कैरवचक्रवालं।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहितभियोगाः।।

४. एते सत्पुरुषाः परार्थघटकास्वार्थान् परित्यज्ज्ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
केऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
येतु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।

५. पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति
आपद्गतंन जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः

६. मनसिवचसिकाये पुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्यनित्यं
निजहृदि विकसन्तः सन्ति सन्तःकियन्तः।

चित्रकथा

# बाल्यादेव निष्कल्पषाः निरीर्ष्याः भवितव्याः

तेलुगु मूलम् - श्रीमती वाविलाल् नागवल्लि
चित्राणि - डा.श्रीधरण् कौलिकि

संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

हस्तिनापुरे कौरवपाण्डवाः विद्याभ्यासे विविधक्रीडाविलासैः कालं यापयन्ति स्म। तदा कदाचित् भीमः स्वक्रीडायां कौरवान् बाध्यमानान् कुर्वन् अपहसितान् च करोतिस्म। भीमबाधाबाधिताः सोदराः स्वदुर्योधनसोदसकाशं गत्वा स्वाबाधाः निवेदयामासुः। पश्चात् कथा -

सोदर! दुर्योधन! भीमबाधाः वयं न भरिष्यामः।

सः भीमः किङ्करोतीति चेत्।

अस्माकं केशान् गृहीत्वा भूमौ पातयन् घातयति। अस्माकं शिरोवेदना जायते।

अहो! तथा भूमौ पातयित्वा घातयति वा?



अस्मान् दश एकभुजकक्ष्यायां, अन्यान् दश अन्यभुजकक्ष्यायां, धृत्वा जले मज्जनोन्मज्जनान् करोति। उच्छ्वासनिश्श्वासावपि न कर्तुं शकनुमः।

सोदर! अपि च वानरक्रीडायां वृक्षस्थान् अस्मान् दृष्ट्वा वृक्षं चालयन् फलानीव अधः पातयति। नवयमिदं भरिष्यामः।

एवमपि करोति वा?



अहो! इदं वा तस्य दुष्कृत्यम्। एवं युष्माभिः क्रीडति वा? तस्य प्रतीकारं करिष्यामि। यूयं गच्छन्तु।

गच्छामः सोदर! तस्य यत्किमपि प्रतीकारं कुरु।

दुर्योधनः पितुः धृतराष्ट्रसकाशं गत्वा एवं वदति।हे पितः! नमस्ते! प्रणामकोटितीर्थसकाशे वनभोजनाचरणाशा वर्तते। तत्प्रयत्नान् कुर्वन्तु।

तथैव करिष्यामि





वनभोजने सर्वे सानन्दं क्रियाकलापे प्रवर्तन्ते। तदा भीमः।
हे भीमसेन अत्र आगच्छ! इमानि मोदकानि खाद।
एतमेव दुर्योधन! इमानि मोदकानि बहुरुचिकराणि वर्तन्ते।
तानि विषमोदकानि भक्षयित्वा भीमः मूर्च्छाङ्गतः।
हे सोदराः अत्र आगत्य भीमं रज्जुभिः बद्ध्वा जले पातयत।
सोदर! सम्यक् उक्तोऽसि तथैव करिष्यामः।
एवं जले पतितः भीमः नागलोकं गतः। तत्र वासुकिः दृष्ट्वा आर्यक! कस्य अयं पुत्रः।
आर्य महाप्रभो! अयं मम पौत्रः। शूरसेनपुत्रिकायाः कुन्त्याः पुत्रः भीमः।
पुत्र भीमसेन अत्र आगच्छ। इमानि रसपानीयानि पिब रुचिकराणि भवन्ति।
कुन्तीदेवी स्वपुत्रः भीमसेनः न दृश्यते इति रोदिति भीमः - पानीयानि बहुरुचिकराणि बलवर्धकानि अष्टकुण्डभरितानि अपिबम्। निद्रापरवशः भवामि निद्रास्यामि पितामह! पश्चाद्दिने भीमः निद्रोत्थितः।
पुत्र भीमसेन! त्वदर्थं माता निरीक्षते। गच्छ! बलशाली भूत्वा वर्धस्व।
एवमेव पितामह! धन्यवादाः पुनर्मिलिष्यामि।
मातः अहमागतः इति भीमः स्वकथां सर्वां मातुः निवेदयामास।तथा प्रवृत्तं वा। भवतु त्वमागतः। मम शुभमिदम्। परमात्मने वन्दनानि।
K-Sreedharan
एवं बाल्ये प्रवृत्ताः ईर्ष्याद्वेषाः भविष्यन्महाभारत संग्रामाय मार्गाः आसन्।
नीति : - बालवृक्षः बाल्यदशायामेव वक्रीकरणीयः नमनीयः। बाल्ये शत्रुत्वप्रतीकाराः प्रवृद्धाः युक्तवयसि पश्चाच्च तथैव प्रवृद्धाः भविष्यन्ति। अतः बाल्ये एव ते ईर्ष्याद्वेषाः निर्मूलिताश्चेत् पश्चाज्जीवितं सुखशान्तिमयं स्यात्।

# बालविनोदिनी

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?




अस्य चित्रपटस्य रञ्जनं कुर्मः वा?



गोदादेवी कं मार्गमनुसृत्य कृष्णं भगवन्तं प्राप्स्यति।




गोदाचित्राणि पश्यत।




1. पेरियाल्वरुमहाशयेन गोदादेवीप्राप्तिः।
2. पित्रा सह गोदादेवी पुष्पमालाकरणम्।
3. कृष्णलीलाः गोदादेवी शुकं वदति।
4. कृष्णर्थं कृतमालां स्वयमेव गोदा धरति।
5. गोदादेवी तिरुप्पावै गानं कुर्वन्ती नगर परिभ्रमणं करोति।
6. कृष्णेन गोदादेव्याः कल्याणम्।
7. गोदादेवी रामानुजमहाशयेन सम्भाषणम्।
8. तिरुपति गोविन्दराजालये गोदादेवी।



सत्यात् देवो वर्षति नास्ति सत्यात् परो धर्मः।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



हैदराबाद् - हिमयत्नगरस्थ श्रीवेङ्कटेश्वरस्वामिनः आलये प्रवर्तित ब्रह्मोत्सवेषु भागत्वेन जून् 5-2025 तिथौ गरुडसेवार्थ उपस्थित ति.ति. देवस्थान धर्मकर्तृमण्डल्यध्यक्षाः श्री बि.आर्.नायुडु दम्पती।



तिरुपति स्विम्स् वैद्यालय परिसरस्थ भवनानि मे मासे 28.2025 तिथौ दर्शितवन्तौ ति.ति.देवस्थान कार्यनिर्वहणाधिकारी जे.श्यामलाराव्, ऐ.ए.एस्., अपि च ति.ति.देवस्थान संयुक्तकार्यनिर्वहणाधिकारी श्री वि.वीरब्रह्मं, ऐ.ए.यस्., महोदयौ।



प्रपञ्चपर्यावरण दिनोत्सव सन्दर्भे जून् 5-2025 तिथौ तिरुमलस्थ गोगर्भडचाम् - समीपे वृक्षकारोपणं कुर्वन्तः ति.ति. देवस्थानानुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच् वेङ्कय्यचौदरि ऐ.आर्.यस्. महोदयाः।



ति.ति.देवस्थान धर्मकर्तृमण्डल्याः एक्स् अफिसियो सभ्यत्वेन मे, 23 - 2025 तिथौ तिरुपति तुडा चेर्मेन् श्री सि.दिवाकर रेड्डि, महोदयाः प्रमाण स्वीकारं चक्रुः। तस्मिन् सन्दर्भे श्री सि.दिवाकररेड्डि दम्पत्यै तीर्थप्रसादान् चित्रपटश्च ददानः ति.ति.देवस्थानानुबन्ध कार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयाः।



ति.ति.देवस्थान प्रधानपर्यवेक्षणं अपि च भद्रताधिकारित्वेन जून् 5 - 2025 तिथौ पदवी बाध्यताः स्वीकरणानन्तरं तिरुमल श्रीवेङ्कटेश्वर दर्शनार्थमागताः श्री के.वी.मुरलीकृष्ण ऐ.पि.यस्., महोदयाः।



ति.ति.देवस्थान सप्तगिरि - आध्यात्मिक मासपत्रिकाकार्यालये प्रधानसम्पादकत्वेन (एफ.ए.सि) मे 31 तिथौ नियमिताः डा. वि.जि.चोक्कलिङ्ग महोदयाः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-06-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026“ LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026” Posting on 5th of every month.

